# ११

इदानीं सायाह्नः। पश्य! अस्मिन् क्रीडाङ्गणे षट् बालकाः कन्दुकेन क्रीडन्ति। कन्दुकः चर्मणा निर्मितः वातेन पूरितश्च।

अतः स ताड्यमानः उत्पतति।

ते बालकाः इतस्ततो धावन्तः हस्तेन पादेन च कन्दुकं ताडयन्ति।

एको बालकः भूमौ उपविष्टः। स चिरं क्रीडनेन श्रान्तः अभवत्।

तस्य गात्रं स्विद्यति। स मुहूर्तं विश्रम्य भूयोऽपि क्रीडिष्यति।

यदा सूर्यः अस्तं गमिष्यति तदा प्रकाशः न वर्तिष्यते।

तदानीम् एते गृहं व्रजिष्यन्ति।